# Pranabharanam

# પ્રાણાભરણં પણ્ડિતરાજશ્રીજગન્નાથવિરચિતમ્

## Document Information

Text title : prANAbharNa

File name : prANAbharNa.itx

Category : major_works

Location : doc_z_misc_major_works

Author : paNDitarAjashrIjagannAtha

Transliterated by : Dhaval Patel drdhaval2785 at gmail.com

Proofread by : Dhaval Patel drdhaval2785 at gmail.com

Description-comments : The text is written by Jagannatha Pandita in honour of king Prananarayana of Kamarupa. https://bsvprasad.wordpress.com/2013/09/23/jagannatha-pandita-raya/

Latest update : September 15, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# પ્રાણાભરણં પણ્ડિતરાજશ્રીજગન્નાથવિરચિતમ્

અથ પણ્ડિતરાજશ્રીજગન્નાથવિરચિતં પ્રાણાભરણમ્ ।
તત્કૃતયૈવ ટિપ્પણ્યા સમેતમ્ ।

વિદ્વાંસો વસુધાતલે પરવચઃશ્લાઘાસુ વાચંયમા
ભૂપાલાઃ કમલાવિલાસમદિરોન્મીલન્મદાઘૂર્ણિતાઃ ।
આસ્યે ધાસ્યતિ કસ્ય લાસ્યમધુના ધન્યસ્ય કામાલસ-
સ્વર્વામાધરમાધુરીમધરયન્વાચાં વિલાસો મમ ॥ ૧॥

વિદ્વાંસ ઇત્યાદિ પ્રાયદર્શનાભિપ્રાયમેતત્ । તેન સહૃદયૈર્ન મનાગપિ વિમનાયિતવ્યમ્ । ભાવધ્વનિશ્ચાયમ્ । ઉત્તરાર્ધપ્રતિપાદ્યાર્થાલમ્બનાયા એતત્પદ્યપ્રયોગાનુભાવાયાઃ કવિગતચિન્તાયાઃ પ્રાધાન્યેનાભિવ્યક્તેઃ । અનુપાત્તોભયનિમિત્તકો વ્યતિરેકઃ સ્ફુટોઽલંકારઃ । કામાલસત્વં વામાવિશેષમધરમાધુરીપ્રકર્ષકમ્ ॥

વિદ્વાણૈવ ગુણજ્ઞતા સમુદિતો ભૂયાનસૂયાભરઃ
કાલોઽયં કલિરાજગામ જગતીલાવણ્યકુક્ષિંભરિઃ ।
એવં ભાવનયા મદીયકવિતે મૌનં કિમાલમ્બસે
જાગર્તુ ક્ષિતિમણ્ડલે ચિરમિહ શ્રીકામરૂપેશ્વરઃ ॥ ૨॥

કવિગતરાજવિષયકરતિભાવધ્વનિશ્ચાયમ્ । ઇત ઊર્ધ્વમયમેવ આ ચરમપદ્યમનુવર્તયિષ્યતે । અસ્ય ચાત્ર મૌનાનુભાવિતો વર્ણનીયાલમ્બનો નિર્વેદો ગુણ ઇતિ પ્રેયોલંકારાસ્પદમ્ । અત્ર ચાચેતનાયાં કવિતાયાં ચેતનત્વાધ્યવસાયમૂલાસંબન્ધે સંબન્ધાત્મિકાતિશયોક્તિર્વિવક્ષિતા । તેન ભાવનામૌનનિર્વેદાનાં સંબોધનસ્ય ચ નાનુપપત્તિઃ ॥

પારીન્દ્રાણાં ધુરીણૈરવનિતલગુહાગર્ભતઃ સમ્પતદ્ભિઃ
સ્વાપભ્રંશાપરાધપ્રચલિતનયનપ્રાન્તમાકર્ણ્યમાનઃ ।
ત્વત્પ્રસ્થાનાન્તરુદ્યત્પ્રલયજલધરધ્વાનધિક્કારધીરો
ઘૃષ્ટક્ષીરોદતીરો જગતિ વિજયતે દુન્દુભિદ્વન્દ્વનાદઃ ॥ ૩॥

અત્ર રાજાલમ્બનસ્ય તાદૃશનાદશ્રવણોદ્દીપિતસ્ય નયનપ્રચલનાનુભાવિતસ્ય ગિરિગુહાગર્ભોત્પતનાભિવ્યક્તેનામર્ષેણ સંચારિણા પરિપોષિતસ્ય પારીન્દ્રગતોત્સાહસ્ય સ્થાયિનો રાજવિષયકરતિભાવાઙ્ગત્વાદ્રસાલંકારત્વમ્ । યદાહુઃ - 'પ્રધાનેઽન્યત્ર વાક્યાર્થે યત્રાઙ્ગં તુ રસાદયઃ । કાવ્યે તસ્મિન્નલંકારો રસાદિરિતિ મે મતિઃ ॥' ઇતિ । તૃતીયચતુર્થચરણયોસ્તુ સ્ફુટાવેવ વ્યતિરેકાતિશયૌ । ધૃષ્ટાશબ્દેન તાદૃશનાદો વેલાચલપ્રતિબદ્ધત્વાદગ્રે ન ગતઃ । અન્યથા લોકાલોકાચલમપિ સ્પૃશેદિતિ ગમ્યતે । એવ મૃષ્ટેતિ નોક્તમ્ । તથા સતિ શૈથિલ્યપ્રત્યયાપત્તેઃ ॥

કિં બ્રૂમસ્તવ વીરતાં વયમમી યસ્મિન્ધરાખણ્ડલ<br>
ક્રીડાકુણ્ડલિતભ્રુ શોણનયનં દોર્મણ્ડલં પશ્યતિ ।<br>
માણિક્યાવલિકાન્તિદન્તુરતરૈર્ભૂષાસહસ્રોત્કરૈ-<br>
ર્વિન્ધ્યારણ્યગુહાગૃહાવનિરુહાસ્તત્કાલમુલ્લાસિતાઃ ॥ ૪॥

અત્ર વિન્ધ્યારણ્યગતાનાં ગુહાગૃહાણામવનિરુહાં ચ વિન્ધ્યગતાનાં ગુહાગૃહાણામરણ્યગતાનામવનિરુહાણાં વા ભૂષણેન કાર્યેણાપ્રસ્તુતેન ત્વદરિનારીણાં સ્વનગરાણિ પરિત્યજ્ય નિશિ ગુહાગૃહેષુ તરુતલેષુ ચ વિન્યસ્ય સકલાભરણાનિ કૃતશયનાનાં પ્રાતસ્ત્વદાગમનસંભ્રમેણ તત્કર્મકં વિસ્મરણં ભારવશાત્પરિત્યાગો વા પ્રસ્તુતો ગમ્યત ઇત્યપ્રસ્તુતપ્રશંસા । કાર્યસ્ય યથાકથંચિત્પ્રસ્તુતત્વે તુ પર્યાયોક્તમલંકારઃ ॥

માહાત્મ્યસ્ય પરોઽવધિર્નિજગૃહં ગમ્ભીરતાયાઃ પિતા<br>
રત્નાનામહમેક એવ ભુવને કો વાપરો માદૃશઃ ।<br>
ઇત્યેવં પરિચિન્ત્ય મા સ્મ સહસા ગર્વાન્ધકારં ગમો<br>
દુગ્ધાબ્ધે ભવતા સમો વિજયતે શ્રીપ્રાણનારાયણઃ ॥ ૫॥

અત્રોપમાનસ્ય ગુણવિશેષપ્રયુક્તસાદૃશ્યાભાવનિબન્ધનમુત્કર્ષં પરિહર્તું વર્ણ્યમાનસાદૃશ્યાત્મકઃ પ્રતીપાલંકારભેદઃ । સ ચોપમાવિશેષ ઇત્યેકે । વિચ્છિત્તિવૈલક્ષણ્યાદતિરિક્ત એવેત્યપરે ॥

તત્ત્વો જન્મ સિતાંશુશેખરતનુજ્યોત્સ્નાનિમગ્નાત્મનો<br>
દુગ્ધામ્ભોનિધિમુગ્ધવીચિવલયૈઃ સાકં પરિક્રીડનમ્ ।

સંવાસઃ સુરલોકસિન્ધુપુલિને વાદઃ સુધાંશોઃ કરૈઃ
કસ્માન્નોજ્જ્વલિમાનમઞ્ચતુતમાં દેવ ત્વદીયં યશઃ ॥ ૬॥

અત્ર યશસિ ધવલતાતિશયસ્તદ્ધર્મિસંબન્ધપ્રયુક્તત્વેન કથિત
ઇતિ સમસ્ય વિષયઃ । અંશુકૃતશ્ચન્દ્રે તત્કૃતશ્ચ ભગવતિ
ભગવત્કૃતશ્ચ રાજનીત્યેવમુત્તરોત્તરમુપચીયમાનો રાજગત ઉત્કર્ષઃ
પ્રતીયત ઇતિ સારવિષયઃ ॥

આબધ્નાસ્યલકાન્નિરસ્યસિતમાં ચોલં રસાકાઙ્ક્ષયા
લઙ્કાયાવશતાં તનોષિ કુરુષે જઙ્ઘાલલાટક્ષતમ્ ।
પ્રત્યઙ્ગં પરિમર્દનિર્દયમહો ચેતઃ સમાલમ્બસે
વામાનાં વિષયે નૃપેન્દ્ર ભવતઃ પ્રાગલ્ભ્યમદ્ભુતમ્ ॥ ૭॥

અત્ર પ્રકૃતિધર્મિગતયોઃ પ્રકૃતાપ્રકૃતયોઃ પ્રકૃતયોરેવ વા
વૃત્તાન્તયોઃ શ્લેષઃ । સ ચ ષટ્સુ સ્થલેષુ શબ્દનાનાત્વનિબન્ધનો
દ્વયોશ્ચાર્થનાનાત્વનિબન્ધનઃ । દ્વાવપ્યેતૌ શબ્દાલંકારાવિતિ
પ્રાઞ્ચઃ । આદ્યો જતુકાષ્ઠન્યાયેન શબ્દશ્લેષણાચ્છબ્દાલંકારઃ,
દ્વિતીયસ્ત્વેકવૃન્તગતફલદ્વયન્યાયેનાર્થશ્લેષણાદર્થાલંકાર ઇતિ
નવ્યાઃ ॥

દેવ ત્વાં પરિતઃ સ્તવન્તુ કવયો લોભેન કિં તાવતા
સ્તવ્યસ્ત્વં ભવિતાસિ યસ્ય તરુણશ્ચાપપ્રતાપોઽનિશમ્ ।
ક્રોડાન્તઃ કુરુતેતરાં વસુમતીમાશાઃ સમાલિઙ્ગતિ
દ્યાં ચુમ્બત્યમરાવતી ચ સહસા ગચ્છત્યગમ્યામપિ ॥ ૮॥

અત્ર પ્રતાપગતઃ પૃથિવ્યાદિસંબન્ધો
લિઙ્ગવિશેષાવચ્છિન્નતત્તત્સાધારણવિશેષણાભિવ્યક્તકામુકવૃત્તાન્તાભિન્નતયા
સ્થિત ઇતિ સમાસોક્તિઃ કાર્યરૂપધર્મપ્રયુક્તશુદ્ધસાધારણ્યેન
વિશેષણસામ્યમાલમ્બ્ય પ્રવૃત્તા । સા ચ નિન્દોત્થાપકત્વાદદ્વ્યાજસ્તુતૌ
ગુણઃ ॥

લોકાનાં વિપદં ધુનોષિ કુરુષે સમ્પત્તિમત્યુત્કટા-
મિત્યલ્પેતરજલ્પિતૈર્જડધિયાં ભૂપાલ મા ગા મદમ્ ।
યત્કીર્તિસ્તવ વલ્લભા લઘુતરબ્રહ્માણ્ડભાણ્ડોદરે
પિણ્ડીકૃત્ય મહોન્નતામપિ તનું કષ્ટેન હા વર્તતે ॥ ૯॥

અત્રાપિ પ્રાગ્વત્ । પરં

ત્વાધારાધેયાન્યતરવિસ્તૃતત્વસિદ્ધિફલકાન્યતરન્યૂનત્વકલ્પનાત્સાધિકાલંકારોઽપિ તસ્યાં ગુણઃ ॥

ક્ષોણીં શાસતિ મય્યુપદ્રવલવઃ કસ્યાપિ ન સ્યાદિતિ
પ્રૌઢં વ્યાહરતો વચસ્તવ કથં દેવ પ્રતીમો વયમ્ ।
પ્રત્યક્ષં ભવતો વિપક્ષનિવહૈર્ધામુત્પતદ્ભિઃ ક્રુધા
યદ્યુષ્મત્કુલકોટિમૂલપુરુષો નિર્ભિદ્યતે ભાસ્કરઃ ॥ ૧૦॥

ઇહ ત્વધિકસમાસોક્તિભ્યામનાલિઙ્ગિતૈવ સા [વ્યાજસ્તુતિઃ] ॥

આસ્વાદેન રસો રસેન કવિતા કાવ્યેન વણી તયા
લોકાન્તઃકરણાનુરાગરસિકઃ સભ્યઃ સભા ચામુના ।
દારિદ્ર્યાનલદહ્યમાનજગતીપીયૂષધારાધર
ક્ષોણીનાથ તથા ભવાંશ્ચ ભવતા ભૂમણ્ડલં ભાસતે ॥ ૧૧॥

માલાદીપકમેતદિતિ પ્રાઞ્ચઃ । દીપકસ્ય સાદૃશ્યમૂલકતાનિયમાન્ન માલાદીપકમપિ ત્વેકાવલીભેદ ઇતિ તુ વયમ્ ॥

અમ્લાયન્યદરાતિકૈરવકુલાન્યમ્લાસિષુઃ સત્વરં
દૈન્યધ્વાન્તકદમ્બકાનિ પરિતો નેશુસ્તમાં તામસાઃ ।
સન્માર્ગાઃ પ્રસરન્તિ સાધુનલિનાન્યુલ્લાસમાતન્વતે
તન્મન્યે ભવતઃ પ્રતાપતપનો દેવ પ્રભાતોન્મુખઃ ॥ ૧૨॥

ઇહ રૂપકનિષ્પાદિતલિઙ્ગકમનુમાનં નિમિત્તવિરહાદુત્પ્રેક્ષાયા અયોગાદ્વાચકમનુમિતિપરમ્ ॥

ઉત્ક્ષિપ્તાઃ કબરીભરં વિવલિતાઃ પાર્શ્વદ્વયં ન્યક્કૃતાઃ
પાદામ્ભોજયુગં રુષા પરિહૃતા દૂરેણ ચેલાઞ્ચલમ્ ।
ગૃહ્ણન્તિ ત્વરયા ભવત્પ્રતિભટક્ષ્માપાલવામભ્રુવાં
યાન્તીનાં ગહનેષુ કણ્ટકચિતાઃ કે કે ન ભૂમીરુહાઃ ॥ ૧૩॥

અત્ર કણ્ટકચિતત્વેન કબરીગ્રહણાદેઃ સંકીર્ણત્વાત્કાર્યધર્માન્તરા સંકીર્ણશુદ્ધસાધારણ્યેન વિશેષણસામ્યમાલમ્બ્ય પ્રવૃત્તા સમાસોક્તિઃ ॥

દૃષ્ટિઃ સંભૃતમઙ્ગલા બુધમયી દેવ ત્વદીયા સભા
કાવ્યસ્યાશ્રયભૂતમાસ્યમરુણાધારોઽધરઃ સુન્દરઃ ।
ક્રોધસ્તેઽશનિમૂરુદારધિષણ સ્વાન્તં તુ સોમાસ્પદં
રાજન્નૂનમનૂનવિક્રમ ભવાન્સર્વગ્રહાલમ્બનમ્ ॥ ૧૪॥

અત્રોત્પ્રેક્ષ્યમાનસર્વગ્રહાલમ્બનત્વસ્ય સમાનાધિકરણેષુ ધર્મેષુ તત્તદ્ગ્રહાશ્રિતાઙ્ગકત્વેષુ વિશેષણીભૂતૈસ્તત્તદ્ગ્રહૈઃ સહ વિષયસ્ય રાજ્ઞો કલ્યાણાશ્રયત્વાદિષુ વિશેષણાનાં કલ્યાણાદીનાં શ્લેષેણાભેદસમ્પાદનદ્વારા તાદૃશધર્મસાધારણતાસમ્પત્તૌ તન્નિમિત્તકોત્પ્રેક્ષાસિદ્ધિઃ ॥

સૃષ્ટિઃ સૃષ્ટિભુવા પુરા કિલ પરિત્રાતું જગન્મણ્ડલં
ત્વં ચણ્ડાતપનિર્દયં તપસિ યજ્જ્વાલાજટાલૈઃ કરૈઃ ।
સંરમ્ભારુણલોચનો રણભુવિ પ્રસ્થાતુકામોઽધુના
જાનીમો ભવતા ન હન્ત વિદિતઃ શ્રીકામરૂપેશ્વરઃ ॥ ૧૫॥

અત્ર રાજવર્ણનાઙ્ગત્વેન રવેર્ભયોત્પાદને વર્ણ્યત્વેન પ્રસ્તુતે સાક્ષાત્તદનનુગુણત્વેનાપ્રસ્તુતેન પ્રસ્થાનેન સાક્ષાત્તદનુગુણં રિપુકર્તૃકં સૂર્યમણ્ડલભેદનં કાર્યં ગમ્યતે ॥

આયાતા કમલાસનસ્ય ભવનાદ્દ્રષ્ટું ત્રિલોકીતલં
ગીર્વાણેષુ દિનાનિ કાનિચિદહો નીત્વા પુનઃ કૌતુકાત્ ।
ભ્રાન્ત્વા ભૂવલયે મહાકવિકુલોપાસ્યા તવાસ્યામ્બુજે
રાજન્સમ્પ્રતિ સત્યધામનિ ગિરાં દેવી સુખં વર્તતે ॥ ૧૬॥

અત્રૈકસ્યાધેયસ્યાનેકાધારસંબન્ધાત્પર્યાયઃ । તત્ર પ્રથમચરણગતમધિકરણમાર્થવિશ્લેષાવધિકપઞ્ચમ્યા વિશ્લેષસ્યોપશ્લેષાપેક્ષત્વેનૌપશ્લેષિકાધિકરણસ્યાક્ષેપગમ્યત્વાત્ । સત્યધામનીતિ શ્લેષભિત્તિકાભેદાધ્યવસાનેન મુખસ્ય સત્યલોકતાસિદ્ધૌ સુખવર્તનસિદ્ધિઃ ॥

વિદ્વદ્દૈન્યતમસ્ત્રિમૂર્તિરથવા વૈરીન્દ્રવંશાટવી-
દાવાગ્નિઃ કિમહો મહોજ્જ્વલયશઃશીતાંશુદુગ્ધામ્બુધિઃ ।
કિં વાનઙ્ગભુજંગદષ્ટવનિતાજીવાતુરેવં નૃણાં
કેષામેષ નરાધિપો ન જનયત્યલ્પેતરાઃ કલ્પનાઃ ॥ ૧૭॥

અત્ર કોટીનામારોપાન્તરમૂલકત્વાત્પરમ્પરિતસંશયઃ સ ચાહાર્યઃ, મૂલારોપસ્ય તથાત્વાત્ । કવાવિવ કવિનિબદ્ધપ્રમાત્રન્તરેઽપ્યાહાર્યબુદ્ધેરવિરોધાત્ ॥

નદન્તિ મદદન્તિનઃ પરિલસન્તિ વાજિવ્રજાઃ
પઠન્તિ બિરુદાવલીમહિતમન્દિરે બન્દિનઃ ।
ઇદં તદવધિ પ્રભો યદવધિ પ્રવૃદ્ધા ન તે

યુગાન્તદહનોપમા નયનકોણશોણદ્યુતિઃ ॥ ૧૮॥

અત્ર મુખ્યાર્થસ્ય રાજવિષયાયાઃ કવિરતેરુપકારકસ્ય યદૈવ તવ
કોપોદયસ્તદૈવ તવ રિપૂણાં સમ્પદો ભસ્મસાદ્ભવિષ્યન્તીતિ વસ્તુન
ઉપકારિકા નયનકોણશોણદ્યુતેર્યુગાન્તદહનોપમા ॥

મયિ ત્વદુપમાવિધૌ વસુમતીશ વાચંયમે
ન વર્ણયતિ મામયં કવિરિતિ ક્રુધં મા કૃથાઃ ।
ચરાચરમિદં જગજ્જનયતો વિધેર્માનસે
પદં ન વિદધેતરાં તવ સમો દ્વિતીયો નરઃ ॥ ૧૯॥

અત્ર ત્વત્સમોઽન્યો નાસ્તીતિ પ્રત્યયાદુપમાનલુપ્તોપમા વ્યઙ્ગ્યેતિ પ્રાગ્ચઃ ।
સર્વથૈવ સામ્યસ્યાપ્રતિષ્ઠાનાન્નેયમુપમા । અન્યથા વ્યતિરેકસ્યાપિ
તત્ત્વાપત્તેઃ । 'ઢુંઢોલ્લન્તો મરિસસિ કંટકકલિઆઇં કેઐવણાઇમ્ ।
માલ.ઇકુસુમસરિચ્છં ભમર ભમંતો ણ પાવેસિ ॥' ઇત્યત્ર તુ ન
પ્રાપ્સ્યસીત્યુક્ત્વા ક્વચિત્ત્વદગોચરે સ્થલે ભવિષ્યતીતિ પ્રતીતેઃ
સાદૃશ્યપ્રતિષ્ઠાનાલ્લુપ્તોપમાસ્તુ । તસ્માદસમાલંકાર એવાયમિતિ તુ નવ્યાઃ ॥

ભુજભ્રમિતપટ્ટિશોદ્દલિતદૃપ્તદન્તાવલં
ભવન્તમરિમણ્ડલક્ષ્થન પશ્યતઃ સંગરે ।
કરાલકુલિશાહતિસ્ફુટવિભિન્નવિન્ધ્યાચલો
ન કસ્ય હૃદયં ઝટિત્યધિરુરોહ જમ્ભાહિતઃ ॥ ૨૦॥

અત્ર સ્મરણાલંકારઃ પરંતુ લક્ષ્યઃ ॥

યમઃ પ્રતિમહીભૃતાં હુતવહોઽસિ તન્નીવૃતાં
સતાં ખલુ યુધિષ્ઠિરો ધનપતિર્ધનાકાઙ્ક્ષિણામ્ ।
ગૃહં શરણમિચ્છતાં કુલિશકોટિભિર્નિર્મિતં
ત્વમેક ઇહ ભૂતલે બહુવિધો વિધાત્રા કૃતઃ ॥ ૨૧॥

અત્ર કવિના યમત્વાદિના રૂપેણ રાજ્ઞો રૂપવતઃ કરણાદ્રૂપકેણ
વિપક્ષભૂપાલાદીનામેતસ્મિન્નાગતે યમત્વાદિના ભ્રાન્તેરપિ સંભવાદ્ભ્રાન્તિમતા
તૈરેવાનેકૈર્ગ્રહીતૃભિરનેકૈર્ધર્મૈરુલ્લેખનાદુલ્લેખવિશેષેણ ચ સહ
સંકીર્ણોઽપિ સંબન્ધિષષ્ઠ્યન્તભેદપ્રયુક્તવર્ણ્યાનેકવિધત્વક ઉલ્લેખઃ ॥

દ્વિનેત્ર ઇવ વાસવો મિતકરો વિવસ્વાનિવ
દ્વિતીય ઇવ ચન્દ્રમાઃ શ્રિતવપુર્મનોભૂરિવ ।

નરાકૃતિરિવામ્બુધિર્ગુરુરિવ ક્ષમામાગતો
નુતો નિખિલભૂસુરૈર્જયતિ કામરૂપેશ્વરઃ ॥ ૨૨॥

અત્ર રાજગતાનાં દ્વિનેત્રત્વાદીનાં વાસવાદિતાદાત્મ્યવિરોધિનાં વિરોધનિવર્તનાય વિષયિષુ વાસવાદિષ્વારોપેણ સાધારણીકરણાત્તન્નિમિત્તકોત્પ્રેક્ષા । સા ચેહ માલારૂપા । ન ચાત્રોપમા શક્યરૂપણા । દ્વિનેત્રત્વાદ્યુક્તેર્નિષ્પ્રયોજનકત્વાપત્તેઃ । ન ચોપમાનિષ્પાદકં તેષાં સાધારણ્યં તદભાવેઽપિ પરમૈશ્વર્યાદિભિઃ પ્રતીયમાનૈસ્તસ્યા નિષ્પત્તેઃ । અસુન્દરત્વેનોપમાનિષ્પાદકતયા કવેરનભિપ્રેતત્વાચ્ચ । એવં દ્વિતીયાદીનાં ચન્દ્રાદિષ્વારોપોઽપ્યુપમાયાં સત્યામનર્થક એવ સ્યાત્ ॥

દીનવ્રાતે દયાર્દ્રા નિખિલરિપુકુલે નિર્દયા કિં ચ મૃદ્વી
કાવ્યાલાપેષુ તર્કપ્રતિવચનવિધૌ કર્કશત્વં દધાના ।
લુબ્ધા ધર્મેષ્વલુબ્ધા વસુનિ પરવિપદ્દર્શને કાંદિશીકા
રાજન્નાજન્મરમ્ય સ્ફુરતિ બહુવિધા તાવકી ચિત્તવૃત્તિઃ ॥ ૨૩॥

અત્ર વિષયાનેકત્વપ્રયુક્તચિત્તવૃત્તેરનેકવિધત્વમિત્યુલ્લેખઃ । તત્ર ચ તદીયચિત્તવૃત્તિત્વેનૈકત્વાધ્યવસાનં તન્ત્રમ્ ॥

દેવાઃ કે પૂર્વદેવાઃ સમિતિ મમ નરઃ સન્તિ કે વા પુરસ્તા-
દેવ જલ્પન્તિ તાવત્પ્રતિભટપૃતનાવર્તિનઃ ક્ષત્રવીરાઃ ।
યાવન્નાયાતિ રાજન્નયનવિષયતામન્તકત્રાસિમૂર્તે-
ર્મુગ્ધારિપ્રાણદુગ્ધાશનમસૃણરુચિસ્ત્વત્કૃપાણો ભુજંગઃ ॥ ૨૪॥

અત્ર શુદ્ધપરમ્પરિતરૂપકમ્ ॥

પ્રાચીસંધ્યાસમુદ્યન્મહિમદિનમણેર્માનમાણિક્યકાન્તિ-
ર્જ્વાલામાલા કરાલા કવલિતજગતઃ ક્રોધકાલાનલસ્ય ।
આશાકાન્તાપદામ્ભોરુહતલવિગલન્મઞ્જુલાક્ષારસાભા
સા ભાતિ ક્ષોણિશોભાકરણ તવ દૃશોઃ સંગરે શોણિમશ્રીઃ ॥ ૨૫॥

અત્રાપિ તદેવ પરંતુ માલાત્મકમ્ ॥

ત્વાં સુન્દરીનિવહનિષ્ઠુરધૈર્યગર્વ-
નિર્વાસનૈકરસિકં સમરે નિરીક્ષ્ય ।
કા વા રિપુક્ષિતિભૃતાં બત રાજલક્ષ્મીઃ
સ્વામિવ્રતત્વમપરિસ્ખલિતં બભાર ॥ ૨૬॥

અત્ર શત્રૂણાં રાજ્યલક્ષ્મીસ્ત્વાં પ્રાપ્નેતિ વિવક્ષિતોऽર્થઃ
પાતિવ્રત્યસ્ખલિતરૂપેણાભિહિત ઇતિ પર્યાયોક્તમ્ । તચ્ચ રાજ્યલક્ષ્મ્યા
નાયિકાત્વસિદ્ધ્યર્થં સમાસોક્તિમપેક્ષત ઇતિ સા તત્ર ગુણઃ ॥

નાસત્યયોગો વચનેષુ કીર્તૌ તથાર્જુનઃ કર્મણિ ચાપિ ધર્મઃ ।
ચિત્તે જગત્પ્રાણભવો યદાસ્તે વશંવદાસ્તે કિમુ પાણ્ડુપુત્રાઃ ॥ ૨૭॥

અત્ર પાણ્ડુપુત્રેષુ વિષયેષુ રાજવશંવદતાદાત્મ્યોત્પ્રેક્ષાયાં
રાજાશ્રિતત્વરૂપો વિષયિધર્મઃ શ્લેષેણ વિષયાણાં તદાશ્રિતાનાં
ચાસત્યાભાવશુક્લગુનપુણ્યપરમેશ્વરાણામભેદસમ્પાદનદ્વારા
વિષયસાધારણીકૃતઃ ॥

મન્થાચલભ્રમણવેઘવશંવદા યે
દુગ્ધામ્બુધેરુદપતન્નણવઃ સુધાયાઃ ।
તૈરેકતામુપગતૈર્વિવિધૌષધીભિ-
ર્ધાતા સસર્જ તવ દેવ દયાદૃગન્તાન્ ॥ ૨૮॥

અત્ર દૃગન્તેષુ ન કેવલં સંજીવકત્વાદયોऽમૃતમાત્રગુણ એવ
કવેર્બુબોધયિષિતા અપિ તુ નિખિલજનવશીકારત્વાદયોऽન્યેऽપીતિ
સુધાકણેષ્વોષધીસંસર્ગોऽતિશયાર્થમુપાત્તઃ ॥

કેશૈર્વધૂનામથ સર્વકોષૈઃ પ્રાણૈશ્ચ સાકં પ્રતિભૂપતીનામ્ ।
ત્વયા રણે નિષ્કરુણેન ગાઢં ચાપસ્ય જીવા ચકૃષે જવેન ॥ ૨૯॥

અત્ર ચાપકર્ષણકાર્યાણાનાં કેશાકર્ષણાદીનાં
પૌર્વાપર્યવિપર્યયાત્મનાતિશયેનાનુપ્રાણિતા સહોક્તિઃ ॥

મહેન્દ્રતુલ્યં કવયો ભવન્તં વદન્તુ કિં તાનિહ વારયામઃ ।
ભવાન્સહસ્રૈઃ સમુપાસ્યમાનઃ કથં સમાનસ્ત્રિદશાધિપેન ॥ ૩૦॥

અત્ર શ્લેષોત્થાપિતત્રિદશત્વસંખ્યામાદાય વ્યતિરેક ઉપાત્તોભયનિમિત્તકઃ ॥

સ તુ વર્ષતુ વારિ વારિદસ્ત્વમુદારાશય રત્નવર્ષણઃ ।
સ કુહૂરજનીમલીમસસ્ત્વમિહાન્તર્બહિરેવ નિર્મલઃ ॥ ૩૧॥

અત્રાપિ સ એવ પરં તુ શ્લેષોऽત્રાનુત્થાપકો નિષિધ્યમાનં સામ્યં ચ ન
શાબ્દમિતિ વિશેષઃ ॥

મકરપ્રતિમૈર્મહાભટૈઃ કવિભી રત્નનિભૈઃ સમન્વિતઃ ।

કવિતામૃતકીર્તિચન્દ્રયોસ્ત્વમિહોર્વીરમણાસિ ભાજનમ્ ॥ ૩૩॥

અત્ર રાજ્ઞો જલધ્યુપમાયાઃ
શબ્દેનાભિધાનેઽપ્યઙ્ગોપમાભિરાક્ષેપાદેકદેશવિવર્તિન્યુપમા તેનોત્તરાર્ધ
ઉપમિતસમાસ એવ । વિશેષણસમાસવેદ્યસ્ય તાદાત્મ્યસ્ય પ્રકૃતેઽનુપયોગાત્
॥

પુરઃ પુરસ્તાદરિભૂપતીનાં ભવન્તિ ભૂવલ્લભ ભસ્મશેષાઃ ।
અનન્તરં તે ભ્રુકુટીવિટઙ્કાત્પતન્તિ રોષાનલવિસ્ફુલિઙ્ગાઃ ॥ ૩૪॥

અત્ર પ્રયોજકાતિશયકૃતઃ પ્રયોજ્યશૈઘ્યાતિશયો ગમ્યઃ ।
કાર્યકારણપૌર્વાપર્યવિપર્યયરૂપા ચેયમતિશયોક્તિઃ ॥

ભુવનત્રિતયેઽપિ માનવૈઃ પરિપૂર્ણે વિબુધૈશ્ચ દાનવૈઃ ।
ન ભવિષ્યતિ નાસ્તિ નાભવન્નૃપ યસ્તે ભજતે તુલાસ્પદમ્ ॥ ૩૫॥

અત્રોપમાનલુપ્તોપમેતિ પ્રાઞ્ચઃ । અસમાખ્યમલંકારાન્તરમિતિ તુ વયમ્ ॥

પીયૂષયૂષકલ્પામલ્પામપિ તે ગિરં નિપીતવતામ્ ।
તોષાય કલ્પતે નો યોષાધરબિમ્બમધુરિમોદ્રેકઃ ॥ ૩૬॥

અત્ર સંબન્ધેઽપ્યસંબન્ધ ઇત્યતિશયોક્તિભેદઃ ।
ઉપમેયોપમાનવિશેષણાભ્યામલ્પત્વોદ્રિક્તત્વાભ્યામલ્પયાપિ સહ ભૂયાનપિ
મધુરિમા સામ્યં કર્તું યત્રાનીશસ્તત્ર કિં વાચ્યં ભૂયસ્યેતિ વૈલક્ષણ્યાત્મા
વ્યતિરેકશ્ચ ॥

ભાસયતિ વ્યોમસ્થા જગદખિલં કુમુદિનીર્વિકાસયતિ ।
કીર્તિસ્તવ ધરણિગતા સગરસુતાયાસમફલતાં નયતે ॥ ૩૭॥

અત્ર વ્યજ્યમાનચન્દ્રિકારૂપકસંકીર્ણ ઉલ્લેખધ્વનિઃ ॥

ભાગ્યેન સહ રિપૂણામુત્તિષ્ઠસિ વિષ્ટરાત્ક્રુધાવિષ્ટઃ ।
સહસૈવ પતસિ તેષુ ક્ષિતિશાસન મૃત્યુના સાકમ્ ॥ ૩૮॥

'કેશૈર્વધૂનામ્' ઇત્યત્ર કર્મણઃ સહોક્તિઃ । ઇહ તુ કર્તુરિતિ વિશેષઃ ॥

ત્વયિ પાકશાસનસમે શાસતિ સકલં વસુંધરાવલયમ્ ।
વિપિને વૈરિવધૂનાં વર્ષન્તિ વિલોચનાનિ ચ દિનાનિ ॥ ૩૯॥

અત્ર વર્ષવદાચરન્તીત્યાચારક્વિબન્તેન શ્લેષાચ્છ્લેષમૂલિકા તુલ્યયોગિતા ।
રિપુકામિનીવર્ણનવિષયત્વેનોપમાનોપમેયયોર્દ્વયોરપિ પ્રકૃતત્વાત્ ॥

અહિતાપકરણભેષજ નરનાથ ભવાન્કરસ્થિતો યસ્ય ।
તસ્ય કુતોઽહિભયં સ્યાદખિલામપિ મેદિનીં ચરતઃ ॥ ૪૦॥

અત્ર શ્લેષનિવેદિતસ્ય સર્પભયાભાવસ્યોપપાદકતયોપાત્તસ્ય
રાજનિ ભેષજતાદાત્મ્યારોપસ્યાપ્યુપપાદકતયા સ્થિતં રાજસંબન્ધિનિ
દ્વિષદપકરણરૂપે ધર્મે શ્લેષનિવેદિતસર્પતાપકરણતાદાત્મ્યમિતિ
પ્રથમચરણે શ્લિષ્ટપરમ્પરિતરૂપકં તૃતીયે તુ શ્લેષ એવ ।

કુવલયલક્ષ્મીં હરતે તવ કીર્તિસ્તત્ર કિં ચિત્રમ્ ।
યસ્માન્નિદાનમસ્યા લોકનમસ્યાઙ્ઘ્રિપઙ્કજો હિ ભવાન્ ॥ ૪૧॥

અત્રોત્પાદકસમાનગુણત્વાદુત્પાદ્યસ્યોત્પાદકસંસર્ગાનુરૂપઃ સમાલંકારવિશેષઃ ।
શ્લેષશ્ચાસ્મિન્ગુણઃ ॥

દૃષ્ટઃ સદસિ ચેદુગ્રાશ્ચન્દ્રચન્દનચન્દ્રિકાઃ ।
અથ ત્વં સંગરે સૌમ્યાઃ શેષકાલાનલાસયઃ ॥ ૪૨॥

અત્ર દૃષ્ટઃ સદસીતિ વાક્યે ત્વમિત્યસ્યાપકર્ષણાત્, અથ ત્વં સંગર
ઇત્યત્ર ચ ત્વમિત્યસ્યાનુવર્તનાદ્વાક્યયોઃ પદવિનિમયાત્માલંકારઃ
પૂર્વાર્ધે । ઉત્તરાર્ધે પ્રકૃતાનેકધર્મસંબન્ધાત્તુલ્યયોગિતા ।
ઉપમેયસ્યોત્કૃષ્ટગુણત્વસિદ્ધ્ય ઉપમાનસ્ય
તદ્વિરુદ્ધગુણકલ્પનાત્મકેનાલંકારાન્તરેણ શબલિતા ॥

અપારે ખલુ સંસારે વિધિનૈકોઽર્જુનઃ કૃતઃ ।
કીર્ત્યા નિર્મલયા ભૂપ ત્વયા સર્વેઽર્જુનાઃ કૃતાઃ ॥ ૪૩॥

ઇહ શ્લેષમૂલો વ્યતિરેકઃ ॥

દધીચિબલિકર્ણેષુ હિમહેમાચલાબ્ધિષુ ।
અદાતૃત્વમધૈર્યં ચ દૃષ્ટે ભવતિ ભાસતે ॥ ૪૪॥

અત્રાપિ સૈવ તથાવિધા । યથાસંખ્યસંકરસ્તુ વિશેષઃ ॥

શાસતિ ત્વયિ હે રાજન્નખણ્ડાવનિમણ્ડલમ્ ।
ન મનાગપિ નિશ્ચિન્તે મણ્ડલે શત્રુમિત્રયોઃ ॥ ૪૫॥

ઇહાપિ તુલ્યયોગિતા મિત્રશબ્દશ્લેષોત્થાપિતા વ્યાજસ્તુતિશ્ચ ॥

ભાનુરગ્નિર્યમો વાયં બલિઃ કર્ણોઽથવા શિબિઃ ।

પ્રત્યર્થિનોઽર્થિનશ્ચેત્થં ત્વયિ યાન્તિ વિકલ્પનામ્ ॥ ૪૬॥

ઇહ તુ સંશય ઉલ્લેખાલિઙ્ગિતઃ ॥

કમલાવાસકાસારઃ ક્ષ્માધૃતિફણીશ્વરઃ ।
ભવાન્કુવલયસ્યેન્દુરાનન્દયતિ માનવાન્ ॥ ૪૭॥

ઇહ શ્લિષ્ટપરમ્પરિતં રૂપકં માલારૂપમ્ ॥

ગગને ચન્દ્રિકાયન્તે હિમાયન્તે હિમાચલે ।
પૃથિવ્યાં સાગરાયન્તે ભૂપાલ તવ કીર્તયઃ ॥ ૪૮॥

ઇહ માલોપમાલિઙ્ગિત ઉલ્લેખઃ ॥

મૃગતાં હરયન્મધ્યે વૃક્ષતાં ચ પટીરયન્ ।
નક્ષત્રતાં મહીપાનાં ત્વમિન્દવસિ ભૂપતે ॥ ૪૯॥

ઇહ શુદ્ધપરમ્પરિતા માલારૂપોપમા । આચારક્વિબન્તાચ્છતરિ રૂપાણિ ।
તિઙિ ચૈકમ્ [ઇન્દવસિ] ॥

મધ્યે સુધાસમ્દુરસ્ય સિતામયગૃહોદરે ।
પૂર્ણેન્દુવિષ્ટરે દેવ સ્થાતું યોગ્યાસ્તવોક્તયઃ ॥ ૫૦॥

અત્ર ત્રયાણાં સુધાસમુદ્રાદીનાં વિશેષણવિશેષ્યભાવેન મધુરિમણિ
પરાં કાષ્ઠામધિરૂઢે ત્વદીયોક્તિપદસંબન્ધો યુક્તો ન તુ વિશકલિત
ઇત્યતિશાયકાસદ્વિશેષણનિબન્ધનઃ પ્રૌઢોક્તિઃ ॥

અમૃતલહરીચન્દ્રજ્યોત્સ્નારમાવદનામ્બુજા-
ન્યધરિતવતો નિર્મર્યાદપ્રસાદમહામ્બુધેઃ ।
ઉભયવદયં દેવ ત્વત્તઃ કથં પરમોલ્બણઃ
પ્રલયદહનજ્વાલાજાલાકુલો મહસાં ગણઃ ॥ ૫૧॥

અત્ર કારણગુણવિરુદ્ધસ્વગુણસ્ય કાર્યસ્યોત્પત્તેર્વિષમાલંકારઃ ।
અમૃતલહર્યાદીનાં  ત્રયાણામધરીકરણાત્મના વ્યતિરેકેણ
સંજીવકત્વપરમશીતલત્વવિશુદ્ધત્વસૌન્દર્યાણામતિશયો ગમ્યતે ।
એવમેષુ પદ્યેષુ સંભવન્તોઽપ્યન્યેઽલંકારાઃ સ્ફુટત્વાન્ન વિવેચિતાઃ ।
સહૃદયાનાં પ્રીત્યાવશ્યકં કિંચિદ્વ્યાખ્યાતમન્યત્તુ તૈરેવોલ્લાસનીયમિત્યલં
પલ્લવિતેન ॥

તૈલઙ્ગાન્વયમઙ્ગલાલયમહાલક્ષ્મીદયાલલિતઃ

શ્રીમત્પેરમભટ્ટસૂનુરનિશં વિદ્વલ્લલાટંતપઃ ।
સંતુષ્ટઃ કમતાધિપસ્ય કવિતામાકર્ણ્ય તદ્વર્ણનં
શ્રીમત્પણ્ડિતરાજપણ્ડિતજગન્નાથો વ્યધાસીદિદમ્ ॥ ૫૨॥

દોર્દણ્ડદ્વયકુણ્ડલીકૃતલસત્કોદણ્ડચણ્ડાશુગ-
ધ્વસ્તોદ્દણ્ડવિપક્ષમણ્ડલમિહ ત્વાં વીક્ષ્ય મધ્યેરણમ્ ।
વલ્ગદ્ગાણ્ડિવમુક્તકાણ્ડવલયજ્વાલાવલીતાણ્ડવ-
ભ્રશ્યત્ખાણ્ડવરુષ્ટપાણ્ડવમહો કો ન ક્ષિતીશઃ સ્મરેત્ ॥ ૫૩॥

અત્ર સ્મરણાલંકારઃ । ભાવ ઇતિ તુ ન ભ્રામિતવ્યમ્ ।
સાદૃશ્યમૂલકત્વાતન્મૂલકત્વાભ્યાં ભાવત્વાલંકારત્વયોરિહ વ્યવસ્થિતેઃ
શબ્દવેદ્યત્વાચ્ચ ॥

ઇતિ પણ્ડિતરાજશ્રીજગન્નાથવિરચિતં પ્રાણાભરણં તત્કૃતયૈવ ટિપ્પણ્યા
સમેતં સમાપ્તમ્ ।

The text is written by Jagannatha Pandita
in honour of king Prananarayana of Kamarupa.
https://bsvprasad.wordpress.com/2013/09/23/jagannatha-pandita-raya/

Encoded and proofread by Dhaval Patel drdhaval2785 at gmail.com

*Pranabharanam*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*